## पूतक्रतोरै च। (३६/४०३)

पूतक्रतुशब्दस्य स्त्रियाम् ऐकारश्चान्तादेशो [1]भवति, ङीप् प्रत्ययः। पूतक्रतोः स्त्री पूतक्रतायी (म.भा.२.२१५)। त्रय एते योगाः (४.१.३६–३८) पुंयोगप्रकरणे (४.१.४८/५०४) [2]द्रष्टव्याः। यया हि पूताः क्रतवः पूतक्रतुः सा भवति (म. भा. २.२१५)॥

## वृषाकप्यग्निकुसित[3]कुसिदानामुदात्तः। (३७/४०४)

वृषाकप्यादीनामुदात्त ऐकारादेशो भवति स्त्रियाम्, ङीप् च प्रत्ययः। वृषाकपिशब्दो मध्योदात्त उदात्तत्वं प्रयोजयति। अग्न्यादिषु पुनरन्तोदात्तेषु स्थानिवद्भावादेव सिद्धम्। [4]वृषाकपेः स्त्री वृषाकपायी। अग्नायी। कुसितायी। [5]कुसिदायी। पुंयोगे इत्येव, वृषाकपिः स्त्री॥

## मनोरौ वा। (३८/४०५)

ऐ[6] उदात्तः इति[7] वर्तते। मनुशब्दात् स्त्रियां ङीप् प्रत्ययो भवति, औकारश्चान्तादेशः, ऐकारश्च उदात्तः। [8]वाग्रहणेन द्वावपि विकल्प्येते। तेन त्रैरूप्यं[9] भवति। मनोः स्त्री मनायी (काठ. ३०.१)। मनावी (मै. १.८)। मनुः (मै. १.८)। मनुशब्दः आद्युदात्तः॥

## वर्णादनुदात्तात्तोपधात्तो नः। (३९/४०६)

वा इति वर्तते। वर्णवाचिनः प्रातिपदिकात् अनुदात्तान्तात् तकारोपधाद् वा ङीप् प्रत्ययो भवति, तकारस्य[10] नकारादेशो भवति। एता, एनी (ऋ. १.१४४.६)। श्येता, श्येनी। हरिता, हरिणी। सर्वे एते आद्युदात्ताः, 'वर्णानां तणतिनितान्तानाम्' (फि. सू. २.१०) इति वचनात्। वर्णात् इति किम्? [11]प्रकृता। प्ररुता। गतिस्वरेणाद्युदात्तः (६.२.४९/३७८३)। अनुदात्तात् इति किम्? श्वेता। घृतादित्वादन्तोदात्तः (फि. सू. १.२१)। तोपधात् इति किम्? अन्यतो ङीषं वक्ष्यति। अतः इत्येव, [12]शितिर्ब्राह्मणी।

[३४५] [13]पिशङ्गादुपसङ्ख्यानम्। (म. भा. २.२१५)

[14]पिशङ्गी।

[३४६] असितपलितयोः प्रतिषेधः[15]। (म. भा. २.२१५)

असिता। पलिता।

[३४७] [16]छन्दसि [17]क्नम् इत्येके। (म. भा. २.२१६)

'असिक्नी' (शौ. अ. १.२३.१)। 'पलिक्नी'। (ऋ. ५.२.४)। भाषायामपीष्यते। गतो गणस्तूर्णमसिक्निकानाम्॥

---

1. भवति नास्ति फ. 2. द्रष्टव्याः नास्ति फ. 3. कुसीदानाम् इ. क. 4. वृषाकपेः स्त्री नास्ति ब. 5. कुसीदायी इ. क. ह, कुसीतायी ह. 6. च इत्यधिकम् क. ड. फ. 7. च इत्यधिकम् फ. 8. वाग्रहणे क. फ. 9. सिद्धम् इत्यधिकम् ग, भवति नास्ति ब. 10. च इत्यधिकम् क. फ. ह. 11. प्रहुता ब, प्रहूता अ. 12. शिशुरियं ब्राह्मणी ह. 13. पिसंगात् क. 14. पिसंगी क. 15. वक्तव्यः इत्यधिकम् क. फ. ह, वाच्यः इत्यधिकम् इ. 16. तयोः इत्यधिकम् फ. 17. क्नमिच्छन्त्येके क, क्नमेक इच्छति ड.